दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् वैशाखशुक्लप्रतिपदा
बैशाख 05 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-3 ■ वर्ष-5 ■ अङ्क-176 | 1 | अप्रैल 18, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 हरिवंश नारायणसिङ्घः राज्यसभायाः उपसभापतिपदस्य कृते निर्विरोधं तृतीयवारं निर्वाचितः

3 जनगणना-२०२७ इत्यस्य बिहारभूमौ शुभारम्भः, राज्यपालेन स्वगणनया राष्ट्राभियानस्य उद्घाटनं कृतम्

3 पाण्डुलिपि-संरक्षण-डिजिटलीकरण-कार्यस्य जिलाधिकारिणा निरीक्षणम्, आवश्यकनिर्देशाः प्रदत्ताः

## नारीशक्ति-वन्दन-आधिनियमः प्रवर्तितः



**हिमसंस्कृतवार्ताः।** नारीशक्ति-वन्दन-अधिनियममिति नाम्ना प्रसिद्धः संविधानस्य (षडाधिकैकशततमः संशोधनः) अधिनियमः विंशतित्रयोविंशति प्रवृत्तः अभवत्, येन लोकसभायां तथा देहलीं समेत्य राज्यविधानसभासु महिलानां कृते तृतीयांशः आरक्षणः प्रदत्तः अस्ति। सामाजिकान्तर्जालीये पटले विविधेषु क्षेत्रेषु महिलानां योगदानं प्रशंसयन् श्रीनरेन्द्रमोदी अवदत् यत् स्त्रीशक्तिः सशक्त भारतं निरूपयति। संसदीयकार्यमन्त्री किरेन रिजिजुः उक्तवान् यत् अस्याः अधिसूचनायाः उद्देश्यं दीर्घकालात् प्रतीक्षितानां उपबन्धानां कार्यान्वयनम् अस्ति।

### प्रधानमन्त्रिणा नरेन्द्रमोदिना सर्वान् सदस्यान् संशोधनस्य समर्थनं कर्तुं आग्रहः कृतः।

प्रधानमन्त्रिणा नरेन्द्रमोदिना सर्वान् संसद सदस्यान् 'नारी शक्ति-वन्दन-अधिनियम' संशोधनस्य समर्थनं कर्तुं आग्रहः कृतः। तत् महिलानां न्याय-प्रतिनिधित्वं सुनिश्चितं कर्तुं महत्त्वपूर्णं पदम् इति सः अवदत्। सामाजिक-माध्यमे लिखिते सन्देशे सः उक्तवान् यत् लक्षोपलक्षाः महिलाः संसदः भावान् निर्णयान् च पश्यन्ति। सः सर्वान् पक्षान् अस्य प्रस्तावस्य पक्षे मतदानं कर्तुम् आहूतवान्। श्रीमोदी अवधानं दत्तवान् यत् अस्य संशोधनसम्बद्धानां समाह्वानानां निराकरणं कृतम् अस्ति, तथा च देशस्य अर्ध-जनसंख्यायाः कृते तेषां न्याय-प्रतिनिधित्वं सुनिश्चितं कर्तुम् अधुना समयः आगतः ।

## लोकसभायां महिला-आरक्षण-विधेयकाणां विषये तीक्ष्णं वादविवादः



**हिमसंस्कृतवार्ता।** लोकसभायां संसदि राज्यविधानसभासु च महिलानां सहभागित्वं वर्धयितुं त्रिषु प्रमुखेषु विधेयकेषु चर्चा पुनः समारब्धा, येन सर्वकारस्य विपक्षस्य च मध्ये तीक्ष्णं वाक्प्रहारम् आरब्धम्। विपक्षस्य नेता राहुलगान्धी इत्येषः प्रस्तावितस्य संरचनायाः निन्दाम् अकरोत्, येन निर्वाचनस्य परिदृश्यं परिवर्तितुं शक्यते, उपेक्षितानां समुदायानां च हानिः भविष्यति। अध्यक्षः ओमबिरला-वर्यः सदस्यान् विधि सीमायां एव टिप्पण्यादि कर्तुं उक्तवान्। रक्षामंत्री राजनाथसिंहः, संसदीयकार्यमन्त्री किरेन रिजिजुः च गान्धिनः भाषणं अनुचितम् उक्तवन्तौ। केन्द्रीयमन्त्रिणः एच. डी. कुमारस्वामी, सन्ध्या रे, हेमा मालिनी इत्यादयः भाजपा-नेताः च विधेयकानां समर्थनं कृतवन्तः, तान् महिला-सशक्तीकरणार्थं प्रमुखं पदाक्षेपम् इति वर्णितवन्तः। कनिमोझी करुणानिधिः, शशि थरूरः, कल्याण बनर्जी इत्यादयः विपक्षस्य नेतारः, आरक्षणं परिसीमनेन सह योजयितुं, तस्य सङ्घीयप्रभावानां विषये च चिन्तां प्रकटितवन्तः। अन्याः सदस्याः पी. वी. मिधुन रेड्डी, डिम्पल यादवः, हरसिमरत कौर बादलः च न्यायाधारित कार्यान्वयनस्य, महिला सशक्तीकरणस्य विषये विस्तृत-ध्यानस्य च आवाहनं कृतवन्तः। मन्त्री राजीव रञ्जन सिंहः, राज्यमन्त्री अनुप्रिया पटेलः च सर्वसमावेशकविकासस्य भागत्वेन अस्य उपक्रमस्य समर्थनं कृतवन्तौ ।

## विधानसभा-निर्वाचनात् प्राक् प्रमुखानि राजनैतिक दलानि

### पश्चिमवङ्ग-राज्ये तमिलनाडु-राज्ये च स्वस्य निर्वाचन-प्रचारं द्रुतगत्या कुर्वन्ति



**हिमसंस्कृतवार्ता।** विधानसभा-निर्वाचनात् प्राक् प्रमुखानि राजनैतिक दलानि पश्चिमवङ्ग-राज्ये तमिलनाडु-राज्ये च स्वस्य निर्वाचन-प्रचारं द्रुतगत्या कुर्वन्ति। पश्चिमवङ्ग-राज्ये तृणमूल-काङ्ग्रेस्-दलस्य वरिष्ठा नेत्री तथा मुख्यमन्त्री ममता बनर्जी अद्य उत्तरवङ्गस्य कूचबिहार-जनपदे दलस्य प्रत्याशिनः समर्थने जनसभाम् अकरोत्। जनसभां सम्बोधयन्ती सुश्री बनर्जी अवदत् यत् भाजपा-दलं नागरिकानां कल्याणविषये न चिन्तयति। सा दुर्गापुर-कोलकाता-नगरयोः सार्वजनिकसभाम् अपि सम्बोधयिष्यति। अपरपक्षे भाजपा-नेता महाराष्ट्रस्य मुख्यमन्त्री देवेन्द्र फड्नवीसः अपि दलस्य प्रत्याशिनः समर्थने निर्वाचन प्रचारे भागम् अगृह्णात्। भाजपा नेता असम-राज्यस्य मुख्यमन्त्री हिमन्ता बिस्वा-सरमा अपि उत्तर दिनाजपुर-जनपदस्य हेमताबाद-क्षेत्रे पथप्रदर्शनं कृतवान्। वरिष्ठः सी.पी.आई. एम नेता मोहम्मद् सलीमः अपि उत्तरबङ्गस्य दार्जिलिङ्ग-अलिपुरद्वार-जनपदेयोः दलस्य प्रत्याशिनः समर्थने जनसभासु भागं ग्रहीष्यति। अत्रान्तरे आयकर-विभागः कोलकाता-नगरे तृणमूल-काङ्ग्रेस्-नेतृभिः सह सम्बद्धेषु स्थानेषु अन्वेषणम् अकरोत्, यत्र दलस्य प्रत्याशी देवाशीषकुमारः श्रमिक-सङ्घस्य नेता कुमारसाहः च सम्बद्धौ आस्ताम्। तमिलनाडु-राज्ये प्रचण्ड-उष्णतायामपि निर्वाचन प्रचारः अनुवर्तते।

## सुभाषितम्

**मनस्येकं वचस्येकं, कर्मण्येकं महात्मनाम्।**
**मनस्यन्यत् वचस्यन्यत्, कर्मण्यन्यत् दुरात्मनाम्।।**

भावार्थः- महान और सज्जन व्यक्ति जैसा मन में सोचते हैं वैसा ही कहते भी हैं और करते भी हैं, परन्तु नीच और बुरे स्वभाव वाले व्यक्ति सोचते कुछ और हैं, कहते और करते भी कुछ और ही हैं।




## सम्पूर्णभारते गृह्य-एल.पी.जी. आपूर्तयः स्थिराः एव सन्ति-सुजाता शर्मा

सर्वकारेण उक्तं यत्, पश्चिम एशिया-स्थित्या सम्बद्धाः बाधायाः सत्सु अपि, सम्पूर्णभारते गृह्य-एल.पी.जी. आपूर्तयः स्थिराः एव सन्ति। पेट्रोलियम-सचिवः सुजाता शर्मा इत्येषा अकथयत् यत् प्रतिदिनं प्रायः पञ्चाशत् लक्ष-सिलिण्डर् इत्यस्य वितरणम् अभवत् तथा च अधिकांशानि आरक्षणानि वितरणानि च अधुना डिजिटलीकृतानि सन्ति। सा अग्रे अवोचत् यत् वाणिज्यिक एल.पी. जी. आपूर्तयः प्रायः सप्तति प्रतिशतं यावत् पुनः सम्यक् अभवत्, यत्र आटो-एल. पी. जी. विक्रयणं वर्धितः, लघु-सिलिण्डर् इत्यस्य च नियमितं वितरणं प्रचलति।

## हजारीबागे सुरक्षासेनया चत्वारः माओवादिनः मारिताः

हजारीबागे सुरक्षासेनया सह जाते संघर्षे उपक्षेत्रसेनापतिना सहदेव महतो इत्यनेन सह चत्वारः माओवादिनः मारिताः। महतो इत्यस्य उपरि पञ्चदश-लक्ष-रुप्यकाणां पुरस्कारस्य घोषणा आसीत्। कोबरा सैन्यदलस्य, जनपदारक्षकाणां च संयुक्त-अभियाने शस्त्राणि, माओवादिनः सामग्र्यः च प्राप्तानि। एस. पी. सुमित कुमार अग्रवालेन उक्तं यत् अन्येषाम् अभिज्ञानम् प्रचलति। सुरक्षाबलैः समीपस्थेषु अरण्येषु पर्वतीयेषु च क्षेत्रेषु अन्वेषणं क्रियते।

# हिमाचल-मन्त्रिमण्डलस्य प्रमुखाः निर्णयाः १५८२ पदानां स्वीकृतिः, समर्थनमूल्ये च वृद्धिः



मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खू-महोदयस्य अध्यक्षतायां शुक्रे आयोजितस्य हिमाचलप्रदेश-मन्त्रिमण्डलस्य उपवेशने बहवः महत्त्वपूर्णाः निर्णयाः स्वीकृताः। मन्त्रिमण्डलेन विभिन्नविभागेषु १५८२ पदानां पूरणाय स्वीकृतिः दत्ता। अनेन सहैव प्राकृतिककृषिणा उत्पादितस्य गोधूमस्य न्यूनतम-समर्थन-मूल्यं (MSP) ६० रूप्यकेभ्यः वर्धयित्वा ८० रूप्यकाणि प्रति-किलोग्रामं कृतम्। मक्का-धान्यस्य मूल्यं ४० रूप्यकेभ्यः ५० रूप्यकाणि, चम्बा-मण्डलस्य पाङ्गी-घाटी-क्षेत्रस्य यवस्य मूल्यं ६० रूप्यकेभ्यः ८० रूप्यकाणि, आर्द्रा-हरिद्रायाः मूल्यं ९० रूप्यकेभ्यः १५० रूप्यकाणि तथा अदरकस्य मूल्यं ३० रूप्यकाणि प्रति-किलोग्रामं निर्धारितुं निर्णयः गृहीतः।


## पदानां पूरणाय अनुमतिः

मन्त्रिमण्डलेन आरक्षकविभागे १,००० आरक्षकपदानां (Police Constable) सृजनस्य तेषां पूरणस्य च निर्णयः कृतः। उपवेशने वनविभागे ५०० सहायक-वनरक्षकपदानां सृजनस्य निर्णयः अपि स्वीकृतः, यस्मिन् 'वनमित्राणां' कृते ५० प्रतिशतं आरक्षणं भविष्यति। मन्त्रिमण्डलेन वनविभागाय राजस्वविभागतः सेवानिवृत्तेभ्यः अधिकारिभ्यः कर्मचारिभ्यः ८ नायब-तहसीलदाराः, २० कानूनगो-अधिकारिणः तथा ४४ पटवारिणः निश्चितमानदेयेन नियुक्तुं निर्णयः कृतः। एतदतिरिच्य, विभागस्य १० क्षेत्रीयमण्डलेषु १० विधि-परामर्शदातारः (Legal Consultants) अपि नियुक्ताः भविष्यन्ति।

### सेवानिवृत्त-प्राध्यापकानां सेवाः स्वीकरिष्यन्ते

नूतन-चिकित्सा-महाविद्यालयेषु 'क्लीनिकल' तथा 'नॉन-क्लीनिकल' विशेषज्ञतायुक्तानां शिक्षणकर्मचारिणां न्यूनतां परिहर्तुं मन्त्रिमण्डलेन सेवानिवृत्तानां प्राध्यापकानां (Faculty Members) 'प्रोफेसर' पदे नियुक्तये स्वीकृतिः प्रदत्ता। अनेन निर्णयेन चिकित्सा-महाविद्यालयानां प्रभावी सञ्चालनं सुनिश्चितं भविष्यति। मन्त्रिमण्डलेन सिरमौर-मण्डले जनशक्ति-विभागस्य मण्डलानां प्रशासनिक-व्यवस्थायाः निर्वाचनक्षेत्राधारेण पुनर्गठनस्य निर्णयः अपि कृतः, येन विभागः जनसामान्याय उत्तमाः सुविधाः सुलभतया प्रदातुं शक्नुयात्।

# हिमाचलप्रदेशस्य विद्यालयीयानां छात्राणां कृते स्टेनलेस- इस्पात- निर्मिताः जलकूप्यः प्रदास्यन्ते, विद्यालय- शिक्षा- निदेशालयेन विवरणं याचितम्



हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशसर्वकारः विद्यालयीछात्रेभ्यः सुरक्षित- पेयजलस्य व्यवस्थां कर्तुं 'स्टेनलेस स्टील' धातुनिर्मिताः जलकूप्यः वितरिष्यति। मुख्यमन्त्रिणः सुक्खुमहोदयस्य घोषणानुसारं प्राथमिकस्तरात् उच्चमाध्यमिकस्तरपर्यन्तं सर्वेभ्यः छात्रेभ्यः एताः कूप्यः दीयन्ते। हिमाचलप्रदेशस्य विद्यालय- शिक्षाप्रशासनेन सर्वेभ्यः मण्डलोपनिदेशकेभ्यः (प्रारम्भिक- माध्यमिक- शिक्षा) पत्रं संप्रेष्य अस्मिन् विषये आवश्यकं विवरणं याचितम्।

**अस्याः योजनायाः मुख्योद्देश्यम्-**

पत्रानुसारं मुख्यमन्त्रिणः घोषणानुसारं पूर्वप्राथमिकतः पञ्चमकक्षापर्यन्तं, षष्ठतः अष्टमकक्षापर्यन्तं, नवमतः द्वादशकक्षापर्यन्तं च सर्वेभ्यः लाभान्वितच्छात्रेभ्यः 'स्टेनलेस स्टील' जलकूप्यः प्रदास्यन्ते। अस्याः योजनायाः मुख्योद्देश्यं प्लास्टिकप्रदूषणं न्यूनीकर्तुं, बालेभ्यः च सुरक्षितं पर्यावरणानुकूलं च विकल्पं प्रदातुं वर्तते। राज्यसर्वकारेण पूर्वमेव ५०० मिलिलीटरपर्यन्तं परिमितासु 'पेट' (PET) जलकूप्यासु पूर्णप्रतिबन्धः आरोपितः अस्ति।

## छात्राणां विवरणं याचितम्-

प्लास्टिकप्रयोगं निरुत्साहितुं तथा स्वास्थ्यं प्रति जागरूकतां वर्धयितुं 'स्टेनलेस स्टील' कूप्यः एकं महत्वपूर्णं पदं मन्यते। पत्रे सर्वेभ्यः उपनिदेशकेभ्यः निर्देशः दत्तः यत् ते स्वमण्डलेषु कार्यरतानां १४३ खण्ड-परियोजनाधिकारिणां (BPO) सूचीं, तेषां दूरभाषसङ्ख्यां, विद्युत्पत्रसङ्केतं (Email), कुलच्छात्रसङ्ख्याम् आवश्यककूपीणां सङ्ख्याविवरणं ३० अप्रैल २०२६ पर्यन्तं प्रशासनं प्रति प्रेषयेयुः। शिक्षाप्रशासनेन स्पष्टनिर्देशाः दत्ताः यत् अधिनस्थसंस्थाभ्यः सूचनां सङ्गृह्य समयबद्धरूपेण प्रस्तावः प्रेषणीयः, येन सर्वेभ्यः छात्रेभ्यः समयसापेक्षं जलकूप्यः प्राप्येरन्। इयं योजना सम्पूर्णराज्यस्य सर्वकारीयविद्यालयेषु प्रवर्तयिष्यते, या छात्रेभ्यः सुरक्षितपेयजलप्राप्तौ सहायिका भविष्यति। पर्यावरणसंरक्षणं प्रति सर्वकारस्य प्रतिबद्धतां प्रदर्शयन्ती एषा पहलः छात्रेषु स्वस्थस्वभावं वर्धयितुं, प्लास्टिक-अवकरं न्यूनीकर्तुं च सफला भविष्यति।

# हिमाचल-स्वास्थ्यविभागे अष्टादश 'फार्मेसी-अधिकारी' पदानां गणानुसारं नियुक्तये अधिसूचना निर्गता



हिमाचलप्रदेशस्य स्वास्थ्यसेवा-निदेशालयस्य निर्देशानुसारं 'फार्मेसी-अधिकारी' (एलोपैथी) इत्यस्य प्रशिक्षणार्थिनां अष्टादश रिक्तपदानि गणानुसारं पूरयिष्यन्ते, यस्य विषयस्य विस्तृतसूचना मण्डल-रोजगार-अधिकारिणा अक्षयशर्मणा प्रदत्ता। अस्यां प्रक्रियायां अनारक्षितश्रेण्यां सप्त पदानि मार्च १९९९ गणतः, अनारक्षित-ई.डब्ल्यू.एस. श्रेण्यां द्वे पदे दिसम्बर १९९९ गणतः, अनुसूचितजातेः सामान्यश्रेण्यां चत्वारि पदानि मार्च २००४ गणतः तथा अस्यैव वर्गस्य अन्त्योदय-बी.पी.एल. श्रेण्यां एकं पदं दिसम्बर २००९ गणतः पूरयिष्यते। तथैव अन्यपिछडावर्गस्य सामान्यश्रेण्यां द्वे पदे सितम्बर २००२ गणतः, अस्यैव वर्गस्य बी.पी.एल. श्रेण्यां एकं पदं दिसम्बर २००२ गणतः तथा अनुसूचितजनजातेः सामान्यश्रेण्यां एकं पदं दिसम्बर २००६ गणतः पूरयितुं निर्णयः कृतः अस्ति। अधिकारिणा सूचितं यत् येषां योग्याभ्यर्थिनां नामानि अद्यापि रोजगारकार्यालये पञ्जीकृतानि न सन्ति, ते २० अप्रैल दिनाङ्कात् पूर्वम् अन्तर्जालमाध्यमेन पञ्जीकरणं कारयन्तु तथा जिज्ञासाशमनाय ऊना-मण्डल-रोजगार-कार्यालयस्य दूरभाषसङ्ख्यायां ०१९७५-२२६०६३ इत्यत्र सम्पर्कं कुर्वन्तु।

# हरिवंश नारायणसिङ्घः राज्यसभायाः उपसभापतिपदस्य कृते निर्विरोधं तृतीयवारं निर्वाचितः



हरिवंश नारायणसिङ्घः राज्यसभायाः उपसभापतिपदस्य कृते निर्विरोधं तृतीयवारं निर्वाचितः। सदनस्य नेता जे. पी. नड्डा प्रस्तावम् उपस्थापितवान्, तदा नरेन्द्रमोदी श्री हरिवंशस्य अभिनन्दनं कृत्वा उक्तवान् यत् तस्य अनुभवेन सभायाः कार्यप्रवृत्तिः सुदृढः अभवत्। विपक्षस्य नेता मल्लिकार्जुन् खर्गे, तिरुचि शिवा, सन्दोष कुमारः इत्यादयः अन्ये सदस्याः अपि शुभाशयाः प्रेषितवन्तः।

# "लौकिकन्यायकोशः"

## "रथवडवान्यायः"

रथे योजिते अश्वे {वडवा-इति स्त्रीलिङ्ग शब्दः अश्वा इत्यर्थे} यदि परस्परसहमत्या रथं वहेतां तदा रथगतिः समीचीना भवेत्। तथा संसाररथे योजितौ दम्पती परस्परं सहमत्या जीवनं नयताम्। तेन जीवनरथः समीचीनगत्या चलेत्।

**डा. वर्षा प्रकाश टोणगांवकर**

# जनगणना-२०२७ इत्यस्य बिहारभूमौ शुभारम्भः, राज्यपालेन स्वगणनया राष्ट्राभियानस्य उद्घाटनं कृतम्



**हिमसंस्कृतवार्ताः- डॉ. राघवनाथ झा, पटना, बिहारः।** भारतजनगणना-२०२७ इत्यस्य बिहारराज्ये विधिवत् शुभारम्भः सम्पन्नः। अस्मिन् शुभावसरे राज्यस्य प्रथमपुरुषः माननीयः राज्यपालः लेफ्टिनेन्ट जनरल सैयद अता हसनैनः (सेवानिवृत्तः) स्वगणनया स्वकीयसूचनां प्रविश्य अस्य राष्ट्रियजनगणनाभियानस्य औपचारिकं उद्घाटनं कृतवान्। अवसरेऽस्मिन् राज्यपालेन प्रोक्तं यत् जनगणना राष्ट्रस्य विकासयोजनानां नीतिनिर्माणस्य च मूलाधाररूपा अस्ति। यथार्थाः विश्वसनीयाश्च आँकडाः एव राष्ट्रस्य सर्वतोमुखविकासाय परमावश्यकाः भवन्ति। सः नागरिकान् अपि आहूय उक्तवान् यत् सर्वैः जनगणनाप्रक्रियायां सक्रियभागग्रहणं कर्तव्यं, तथा सम्यक्, पूर्णं, पारदर्शकं च विवरणं निःसंकोचं प्रदेयम्। कार्यक्रमे सम्बन्धितविभागीयाः वरिष्ठाः अधिकारिणः प्रशासनिक-पदाधिकारीणश्च उपस्थिता आसन्। अस्मिन् अवसरविशेषे जनगणना-२०२७ प्रति जनजागरूकतावर्धनाय, स्वगणनाप्रणाल्याः च प्रोत्साहनाय विशेषं बलं दत्तम्।

# पाण्डुलिपि-संरक्षण-डिजिटलीकरण-कार्यस्य जिलाधिकारिणा निरीक्षणम्, आवश्यकनिर्देशाः प्रदत्ताः






हिमसंस्कृतवार्ता। राघव नाथ झा। मधुबनी-जनपदस्य जिलाधिकारिणा आनन्द शर्मा सौराठ सभागाछी स्थलं गत्वा पाण्डुलिपीनां संरक्षण-डिजिटलीकरण-सम्बद्धकार्यस्य निरीक्षणं कृतम्। निरीक्षणावसरे तेन सम्बन्धिताधिकारिभ्यः कार्यस्य सम्यक् क्रियान्वयनार्थं बहवः महत्त्वपूर्णाः निर्देशाः प्रदत्ताः। अस्मिन्नवसरे जिलाधिकारिणा उक्तं यत् जनपदे विद्यमानाः पाण्डुलिपयः अस्माकं समृद्ध-सांस्कृतिक-विरासतस्य अमूल्याः निधयः सन्ति। तासां संरक्षणं डिजिटलीकरणं च अत्यावश्यकम् अस्ति, येन आगामि-पीढ्यः अपि एतस्याः अमूल्य-ज्ञानसम्पदः लाभं प्राप्नुयुः।तेन जनसामान्यान् प्रति आवाहनं कृत्वा उक्तं यत् येषां समीपे पाण्डुलिपयः सन्ति, ते अग्रे आगत्य प्रशासनाय तासां सूचनां ददतु, येन तासामपि डिजिटलीकरणं कारयितुं शक्येत तथा सुरक्षितरूपेण संरक्षितुं च शक्येत।अस्मिन्नवसरे अनुमण्डलाधिकारी चन्दन कुमार झा, विशेषकार्याधिकारी नितेश कुमार पाठक, जिला-कला-संस्कृति-अधिकारी नीतीश कुमार सहित अन्येऽपि पदाधिकारी उपस्थिताः आसन्।

# वार्ता-संवादः

**हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः**

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
एका विचित्रा वार्ता मया पठिता।
एकेन नरेण लक्ष-रूप्यकैः भाटकेन एकं बहुमूल्ययानम् स्वीकृतम्।
तस्मिन् याने तेन पर्णकषायं विक्रीतम्।
**काव्या-** अहो! पर्णकषाय-विक्रयणाय तावान् व्ययः कृतः! आश्चर्यमेव।
अन्या अपरा वार्ता मया श्रुता।
एकः जनः उद्योग-मेलनार्थं गतवान् अस्ति।
परन्तु तत्र गत्वा तेन ज्ञातं यत् सः कार्यालयः एव न विद्यते।
सर्वं कपटं रचितम्।
**नन्दिनी-** हास्यकरम्! विना कार्यालयं मेलनम् आयोजितम्!
पाश्चात्यदेशे एका अन्या हास्यकरी घटना जाता।
एका एकनवति-वर्षीया वृद्धा दूरभाष-यन्त्रस्य उत्तरं न दत्तवती अस्ति।
यदा आरक्षकैः तस्याः गृहं प्राप्तं, तदा सा वैद्युत-क्रीडायां मग्ना दृष्टा।
**काव्या -** तादृशे वयसि अपि वैद्युत-क्रीडायां तस्याः आसक्तिः दृष्टा! अतीव रोचकम्।
इदानीं पर्यावरण-विषये एका उत्तमा वार्ता मया प्राप्ता।
दक्षिण-समुद्रतीरे एकेन जनेन जल-वनानां स्वच्छतायै महान् प्रयासः कृतः।
तेन महती मालिन्य-सामग्री ततः निष्कासिता।
**नन्दिनी-** सत्यम्, तेन उत्तमं कार्यं कृतम्।
अद्यतन्यः वार्ताः अत्रैव समाप्ताः। धन्यवादः।

# महापुरुषः श्रीमद्दवदामोदरस्य आविर्भावतिथिः



**नयनज्योतिशर्मा।** कः न जानाति महापुरुषशंकरदेवम्! सः तु असमीयाजातेः प्रमुखगुरुः इति। वस्तुतः असमप्रदेशे वैष्णवपरम्परायाः केन्द्रस्थलं भवति सत्राणि। सत्रं नाम वैदिकयागविशेषः। परन्तु असमप्रदेशे एषा एका वैष्णवपरम्परारूपेण सर्वविदितमस्ति। अस्य श्रीमन्तशंकरदेवस्य वैष्णवपरम्परां सत्रपरम्परात्वेन प्रतिस्थापनं कृतवान् आसीत् अपरः एकः सहयोगीवैष्णवगुरुः श्रीमद्दवदामोदरः। १४८८ खीष्टाब्दे वैशाखमासस्य शुक्लाप्रतिपदतिथौ कामरूपस्य नलचा इति ग्रामे अस्य महापुरुषस्य आविर्भावम् अभवत्। तस्य पितुः नाम सदानन्दमिश्रः माता च सुशीलादेवी आस्ताम्। उपनयनसंस्कारात् परं दामोदरदेवः शिक्षाग्रहनार्थं पण्डित-कलापचन्द्रभट्टाचार्यस्य संस्कृतटोले नामग्रहणं कृतवान्। एवं षोडशवययावत् तेन विभिन्नविषयकानां वैदिकग्रन्थानाञ्च शिक्षाग्रहणमकरोत् । शिक्षाग्रहनान्तरं तेन पारिवारिकजीवनस्य व्यर्थतायाः परं सनातनवैष्णवधर्मप्रचारार्थम् आत्मानं नियोगं कृतम्। महापुरुशंकरदेवस्य सकाशात् श्रीश्रीरामचन्द्रदेवस्य समिपे एषः दामोदरदेवः दीक्षाग्रहणमकरोत्। तस्य संस्कृत-कायथेली-कामरूपीभाषाषु परं व्युत्पत्तिमासीत्। सः श्रीमद्भागवद्गीतायाः दामोदरीयटीकायाः रचनामकरोत्। वाणीभूषणं कीर्त्तनं दण्डीपर्वञ्चेति ग्रन्थानामपि कर्तृत्वेन दामोदरदेवस्य नाम ज्ञायते। असमीयाभाषायाः प्रथमगद्यकारः भट्टदेवः तस्य अन्यतमशिष्यः आसीत्। एवं प्रकारेण असमीयाभाषासाहित्येऽपि दामोदरदेवस्य विशेषावदानं दृश्यते। महानुभास्यास्य पवित्रजन्मतिथौ अस्माकं पक्षतः तान् सश्रद्धां स्मरणं कुर्मः।

# बालभारती-पब्लिक-विद्यालयस्य दार्लिपाली-क्षेत्रे अद्भुतं शैक्षिकं सफलम्




**हिमसंस्कृतवार्ता- सौरभः दे।** दार्लिपाली (ओडिशा) —एनटीपीसी टाउनशिप-स्थितस्य बालभारती पब्लिक विद्यालयस्य (BBPS) छात्राः २०२६ वर्षस्य कक्षा-दशमी (CBSE) परीक्षायां अत्युत्कृष्टं परिणामं प्राप्तवन्तः। एषः परिणामः विद्यालयस्य शैक्षिक-परम्परां पुनः उज्ज्वलितवान्।अस्मिन् वर्षे त्रयः छात्राः संस्कृत-विषये ,,(Sanskrit) शत-प्रतिशतं अङ्कान् प्राप्तवन्तः, तथा च एकः छात्रः कृत्रिमबुद्धिमत्ता (AI) विषयेस्मिन् अपि शत-प्रतिशतं अङ्कान् अलभत।परीक्षायां भागं गृहीतवन्तः छात्रेषु चत्वारः छात्राः 95% प्रतिशताधिकं, द्वौ छात्रौ 90% प्रतिशताधिकं, तथा द्वौ छात्रौ 85% प्रतिशताधिकं अङ्कान् प्राप्तवन्तः।

**विद्यालयस्य श्रेष्ठ-विद्यार्थिनः सन्ति —**

सुभास्मिता बेहरा (98.6%), ओजस् काम्बले (98.2%), नन्दिनी सिंह (96.6%), ए. जे. अभिनया (95%), प्राची चौधरी (92.4%), निगम प्रधान (90.8%), आदित्य (89.8%), अभिनव कुमार (86.4 %)।विद्यालयस्य प्राचार्या श्रीमती उन्नति जोशी सर्वान् छात्रान् अभिनन्दितवती। सा अवदत्— “एषः परिणामः अस्माकं छात्राणां कठिनपरिश्रमस्य, निष्ठायाः तथा शिक्षकमण्डलस्य समर्पणस्य प्रतिफलम् अस्ति। एतेषां छात्राणां सफलता तेषां सतत-प्रयत्नस्य साक्ष्यम्।” सीईएस ( Child Education Society) तथा एनटीपीसी-( NTPC) द्वयोः संयुक्तसहयोगेन एषा सफलता प्राप्ता, यतः तौ शिक्षायाः विकासे सदा सजगौ तथा तत्परौ स्तः। सम्पूर्णविद्यालयस्य उन्नतौ उभयोः संस्थयोः योगदानम् अनस्वीकरणीयम् अस्ति। अस्य अद्भुतपरिणामस्य कृते उभयपक्षाभ्यां छात्रछात्राभ्यः हार्दिकाः अभिनन्दनानि धन्यवादाश्च प्रदत्ताः।एवं विद्यालयस्य एषा उल्लेखनीया सिद्धिः सम्पूर्णे शैक्षिक-क्षेत्रे प्रशंसां प्राप्तवती।